- Title – इति श्री ब्रह्म [illegible] पुराण उत्तरखण्डः
- Accession No – Title – भागवत महात्म्य
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – श्री गणेशाय नमः ॐ प्रणत मन्त्र चे तमपेत कल्पम
- End – रस प्रवाह संस्थेन श्री शुकेनेरि ।
- Colophon-
- Illustrations -
- Source -
- Subject - पुराण
- Revisor -
- Author -
- Remarks- 1-5, 8-18 अपूर्ण

भा॰मा॰ १

श्रीगणेशाय नमः॥ यं प्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव पुत्रेति तन्मयतया तरवोभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोस्मि॥१॥ नैमिषे सूतमासीनमभिवाद्य महायशा॥ कथामृतरसास्वादकुशलशौनकोब्रवीत्॥२॥ शौनक उवाच॥ अज्ञानध्वांतविध्वंसकोटिसूर्यसमप्रभं॥ सूताख्याहि कथासारं जनकर्णरसायनं॥३॥ भक्तिज्ञानविरागाप्तो विवेको वर्द्धते कथं॥ मायामोहनिराशश्च वैष्णवैः क्रियते कथं॥४॥ इह घोरे कलौ प्रायो जीवश्चासुरतां गतः॥ क्लेशाक्रांतस्य तस्यैव शोधनं किं परायणं॥५॥ श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनं॥ कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधुनः॥६॥ चिंतामणिर्लोकसुखं सुरद्रुः स्वर्गसंपदं॥ प्रयच्छति गुरुः प्रीतो वैकुंठं योगिदुर्लभं॥७॥ सूत उवाच॥ प्रीतिः शौनक चित्ते ते ह्यतो वच्मि विचार्य च॥ सर्वसिद्धांतसंपन्नं संसारभयनाशनं॥८॥ भक्त्योघवर्द्धनं यच्च कृष्णसंतोषहेतुकं॥ तदहं तेभिधास्यामि सावधानतया शृणु॥९॥ कालव्यालमुखग्रासत्रासनिर्नाशहेतवे॥ श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितं॥१०॥ एतस्मादपरं किंचित्त्रिषु लोकेषु न विद्यते॥ जन्मांतरे भवेत्पुण्यं तदा भागवतं लभेत्॥११॥ परीक्षिते कथां वक्तुं सभायां संस्थिते शुके॥ सुधाकुंभं गृहीत्वैव देवास्तत्र समागमन्॥१२॥ शुकं नत्वा वदन्सर्वे स्वकार्यकुशलाः सुराः॥ कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमां॥१३॥ एवं विनिमये जाते सुधा राज्ञा प्रपीयतां॥ प्रपास्यामो वयं सर्वे श्रीम

मि॰ १ शुकेन

राम १

3

भागवतामृतं॥१४॥ क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान्॥ ब्रह्मरातो वि
चार्यैति तदा देवान् जहास ह॥१५॥ अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतं॥
श्रीमद्भागवती वार्त्ता सुराणामपि दुर्लभा॥१६॥ राज्ञो मोक्षं तदा वीक्ष्य पुरा धाता
पि विस्मितः॥ सत्यलोके तुलां बध्वा तोलयत्साधनान्यजः॥१७॥ लघून्यन्या
६ नि जातानि गौरवेणा इदं महत्॥ तदा ऋषिगणाः सर्वे विस्मयं परमं ययौ॥१८॥ मे
शास्त्रं निरे नगद्रूपं भागवतं क्षितौ॥ पठनाच्छ्रवणात्सद्यो वैकुंठफलदायकं॥१९॥ सन
काद्यैः पुरा प्रोक्तं नारदाय दयापरैः॥ सप्ताहेन श्रुतं चैतत्सर्वथा मुक्तिदायकं॥२०॥
यद्यपि ब्रह्मसंबंधाच्छ्रुतमेतत्सुरर्षिणा॥ सप्ताहश्रवणाविधिः कुमारैस्तस्य
भाषितः॥२१॥ शौनक उवाच॥ लोकविग्रहयुक्तस्य नारदस्यास्थिरस्य च॥
विधिश्रावे कुतः प्रीतिः संयोगः कुत्र तैः सह॥२२॥ सूत उवाच॥ अत्र ते कीर्त्तयि
ष्यामि भक्तियुक्तं कथामृतं॥ शुकेन च यत्प्रोक्तं रहःशिष्यं विचार्य च॥२३॥ एक
दाचमविशालायां चत्वारो ऋषयोऽमलाः॥ सत्संगार्थं समायाता ददृशुस्तत्र नार
दं॥ कुमारा ऊचुः॥२४॥ कथं ब्रह्मन्दीनमुखः कुतः चिंतातुरो ह्यधुना॥ त्वरितं गम्य
ते कुत्र कुतश्चागमनं तव॥२५॥ इदानीं शून्यचित्तोसि गतवित्तो यथा नरः॥ त

भा॰मा॰
२

वेदंकुत्तसंगस्यनोचितंवदकारतां॥२६॥श्रीनारदउवाच॥अहंतुपृथिवींयातोज्ञात्वासर्वोत्तमामिमां॥पुष्करंचप्रयागंचकाशींगोदावरींतथा॥२७॥हरिक्षेत्रंकुरुक्षेत्रंश्रीरंगंसेतुवंधनं॥एवमादिषुतीर्थेषुभ्रममाणइतस्ततः॥२८॥नापश्यंकुत्रचिच्छर्ममनःसंतोषहेतुकं॥कलिनाधर्ममित्रेणधरेयंवाधिताधुना॥२९॥सत्यंनास्तितपःशौचंदयादानंनविद्यते॥उदरंभरिणोजीवाःवराकाःकूटभाषिणः॥मंदाःसुमंदमतयोमंदभाग्याह्युपद्रुताः॥पाखंडनिरताःसंतोविरक्ताःसपरिग्रहाः॥३१॥तरुणीप्रभुतागेहेशालकोवुद्धिदायकः॥कन्याविक्रयिणोलोभाद्दंपतीनांचकल्कनं॥३२॥आश्रमायवनैरुद्धाःतीर्थानिसरितस्तथा॥देवतायतनान्यत्रदुष्टैर्नष्टानिभूरिशः॥३३॥नयोगीनैवसिद्धोवानज्ञानीसत्क्रियोनरः॥कलिदावानलेनात्रसाधनंभस्मतांगता॥३४॥अट्टशूलाजनपदाःशिवशूलाःद्विजातयः॥कामिन्यःकेशशूलिन्यःसंभवंतिकलाविह॥३५॥एवंपश्यन्कलेर्दोषान्पर्यटन्नवनीमहं॥यामुनंतटमासाद्ययत्रलीलाहरेरभूत॥३६॥तत्राश्चर्यंमयादृष्टंश्रूयतांतन्मुनीश्वराः॥एकातुतरुणीतत्रविखिन्नाखिन्नमानसा॥३७॥वृद्धौद्वौपतितौपार्श्वेनिश्वसंतौअचेतनौ॥शुश्रूषंतीप्रवोधंतीरुदंतीचतयोःपुरः॥३८॥दशदिक्षुनिरीक्षंतीरक्षितारंनिजंपुनः॥वीज्यमानाशतस्त्रीभिर्वोध्यमानामुहुर्मुहुः॥३९॥दृष्ट्वा

राम
२

दूरागतः सोहं कौतुकेन तदंतिकं मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ॥४०॥ बा
लोवाच ॥ भो भो सधो क्षणं तिष्ट मच्चिंतामपि नाशय दर्शनं तव लोकस्य सर्वथा घह
रं हि परं ॥४१॥ बहुधा तव वाक्येन दुःखशांतिर्भविष्यति ॥ यदा भाग्यं भवेद्भूरि भव
तो दर्शनं तदा ॥४२॥ श्री नारद उवाच ॥ कासि त्वं काविमौ चेमा नार्यः काः पद्मलो
चनाः ॥ वद देवि सुविस्तारं स्वस्य दुःखस्य कारणं ॥ बालोवाच ॥ अहं भक्तिरिति
ख्याता इमौ मे तनयौ मतौ ॥ ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ॥४४॥
गंगाद्याः सरितश्चेमाः मम सेवापरायणाः ॥ तथापि च न मे श्रेयः सेवितायाः सुरैर
पि ॥४५॥ इदानीं शृणु मद्वार्तां सचित्तस्त्वं तपोधन ॥ वार्ता मे विततास्त्यस्ति तां श्रुत्वा सुख
मावह ॥४६॥ उत्पन्ना द्राविडे देशे वृद्धिं कर्णाटके गता ॥ क्वचित्क्वचिन्महाराष्ट्रे गुर्ज
रे जीर्णतां गता ॥४७॥ तत्र घोरात कलेर्योगात्पाखंडैः खंडिता गता ॥ दुर्बलाहं चिरं जा
ता पुत्राभ्यां सह मंदतां ॥४८॥ वृंदावनं पुनः प्राप्य नवीनेव सुरूपिणी ॥ जाताहं युवती
सम्यक् प्रेष्ठरूपा च सांप्रतं ॥४९॥ इमौ तु शयि ~~त्वसमभ्यागतौ तेन दुःखेन दुःखि~~ तावत्र
सुतौ मे क्लिश्यतः श्रमात् ॥ इदं स्थानं परित्यज्य विदेशं गम्यते मया ॥५०॥ जरठत्वं समायातौ
तेन दुःखेन दुःखिता ॥ साहं तु तरुणी कस्मात्सुतौ वृद्धाविमौ कुतः ॥५१॥ त्रयाणां सह
चारित्वात् वैपरीत्यं कथं भवेत् ॥ घटते जरसा माता तरुणौ तनयाविति ॥५२॥ अतः शो

चाभिच्चात्मानं विस्मयाविष्टमानसा॥ वदयोगनिधे धीमन् कारणं चात्र किं भवेत्॥५३॥
नारद उवाच॥ ज्ञानेनात्मनि पश्याभिसर्वमेतत्तवानघे॥ न विषादस्त्वया कार्यो हरिः
शं ते विधास्यति॥५४॥ सूत उवाच॥ इत्यामात्रे रातद्भ्वात्वा वाक्यमूचे मुनीश्वरः॥ श्र
राज्ञ्का वहिता बाले यज्ञो यंत्रासुराः कलिः॥५५॥ तेन लुप्ताः सदाचाराः योगमार्गस्तपांसि
सि च॥ जनाः अघासुरायंते शाठ्याः दुःकर्मकारिताः॥५६॥ इह संतो विषीदंति प्रहृष्यंती
व चासतः॥ धत्ते धैर्यं तु यो धीमान् स धीरः पंडितः कृती॥५७॥ अस्पृश्यानवलोक्येयं शे
ष भारकृता धरा॥ वर्षे वर्षे क्रमाज्जाता मंगलं नापि दृश्यते॥५८॥ न त्वां मपि सुतैः सा
कं कोपि पश्यति सांप्रतं॥ उपेक्षिता नरागाद्धै जर्जरत्वेन संस्थिता॥५९॥ वृंदावनस्य
संयोगात्पुनस्त्वं तरुणी नवा॥ धन्यं वृंदावनं तेन भक्तिर्नृत्यति यत्र च॥६०॥ अत्रेमौ
ग्राहकाभावान्न जरां मपि मुंचतः॥ किंचिदात्मसुखेनेव सुषुप्तिर्मन्यते नयो॥६१॥
भक्तिरुवाच॥ कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः॥ प्रवृत्ते तु कलौ कु
त्र सर्वसारो गतो महान्॥६२॥ करुणापरेणाहरिणाप्यधर्मः कथमीक्षते॥ इमं मे
संशयं छिंधि त्वद्वाचा सुखितास्म्यहं॥६३॥ नारद उवाच॥ यदि पृष्टस्त्वया बाले प्रे
मतः श्रवणं कुरु॥ सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति॥६४॥ यदा मुकुंदो भग
वान्क्ष्मां त्यक्त्वा परं गतः॥ तद्दिनात्कलिरायातः सर्वसाधनबाधकः॥६५॥ दृष्टो दि

ग्विजयेशज्ञादीनवच्छुरसांगतः॥ नमया भारती योग्यं सारं गइव सारस्कृ॥६६॥ यत्फ
लं नास्ति तपसा न योगेन समाधिना॥ तत्फलं लभते सम्यक् कलौ केशवकीर्त्त
नात्॥६७॥ एवाकारं कलिं दृष्ट्वा सारं गइव सारवित्॥ विष्णुरातः स्थापितवान् कलि
जानां सुखाय च॥६८॥ कुकर्मी चरणात्सारः सर्वतो निर्गतोधुना॥ पदार्थाः संस्थित
स्मो वीजहीनाय धातुवा॥६९॥ विप्रैर्भागवती वार्त्ता गेहे गेहे जने जने॥ कारिता
कराला भेन कथा सारस्ततो गतः॥७०॥ अत्युग्रभूरिकर्माणो नास्तिका रौर
वा जनाः॥ तेपि तिष्ठंति तीर्थेषु तीर्थसारस्ततो गतः॥७१॥ मनस्काम्राजयाल्लो
माद्दंमात्पारवद्दसंश्रयात्॥ शास्त्राभ्यसनाच्चैव ध्यानयोगफलं गतं॥७२॥ पंडि
तास्तु कलत्रैस्त्रे रमंते महिषा इव॥ पुत्रोत्पादने दक्षा न दक्षा मुक्तिसाधने॥७३
नहि वैष्णवता कुत्र संप्रदायपुरःसरा॥ एवं प्रलयतां प्राप्तो वस्तुसारः स्थले स्थ
ले॥७४॥ अयं तु युगधर्मो हि वर्त्तते कस्य दूषणं॥ अतस्तु पुंडरीकाक्षः सहते नि
कटस्थितः॥७५॥ इति तद्वचनं श्रुत्वा विस्मया विष्टमानसा॥ भक्तिस्तु चैव चोभूयो
मूपतां तच्छौनकाः॥७६॥ सुरर्षे त्वं च धन्योसि मद्भाग्येन समागतः॥ साधूनां दर्श
नं लोके सर्वसिद्धिकरं परं॥७७॥ इहानंदोयपामेस्यान्तयोपापत्वयोच्यता॥ योगेश

स्थापितेव्रद्धतान्नासाद्य वृत्ते तेधुना॥७८॥ त्वज्जति जगति माया यस्य कायाधवस्ते वचन
रचनमेकं केवलं चाकलय्य ध्रुवपदमपि जातो यत्कृपातो ध्रुवोयं सकलकुशलपात्रं ब्र
ह्मपुत्रं नतोस्मि॥७९॥ इति श्रीपद्मपुराणे उत्तरखंडे भक्तिनारदसंवादे प्रथमोध्यायः॥१
नारद उवाच॥ वृथा खेदयसे बाले अहो चिंतातुरा कथं॥ श्रीकृष्णचरणांभोजं स्मर दुःखं
गमिष्यति॥१॥ द्रौपदी च परित्राता येन कौरवकश्मलात्॥ पालिता गोपसुंदर्यः
स कृष्णः क्वापि नो गतः॥२॥ त्वं तु भक्तिः प्रिया तस्य सततं प्राणतोधिका॥ त्वया
हूतोपि भगवान् याति नीचगृहेष्वपि॥३॥ सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ॥ कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी॥४॥ इति निश्चित्य चिद्रूपः सद्रूपां त्वां स
सर्ज ह॥ परमानंदचिन्मूर्तिः सुंदरीं कृष्णवल्लभां॥ बद्ध्वांजलिं त्वया पृष्टं किं करोमीति चै
कदा॥ त्वां तदाज्ञापयत्कृष्णो मद्भक्तान्पोषयेति च॥ अंगीकृतं त्वया तद्वै प्रसन्नोभूद्धरिस्त
दा॥५॥ मुक्तिं दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ॥ पोषणं स्वेन रूपेण वैकुंठे त्वं करो
षि च॥६॥ भूमौ भक्तविपोषाय छायारूपं त्वया कृतं॥ मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा ग
ता भुवि॥७॥ कृतादिद्वापरस्यांतं महानंदेन संस्थिता॥ कलौ मुक्तिः क्षयं प्राप्ता पाखंड
मयपीडिता॥८॥ त्वदाज्ञया गता शीघ्रं वैकुंठं पुनरेव सा॥ स्मृता त्वयापि चात्रैव मुक्तिरा
याति याति च॥९॥ पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्य च रक्षितौ॥ उपेक्षातः कलौ मंदौ व

द्धो जातो मृतोथ वा ॥१०॥ तस्मात्पि चिंतां मुंच त्वं उपायं चिंतये ह्यहं ॥ कलिनासदृशो को
पि युगो नास्ति वरानने ॥११॥ अतस्त्वां स्थापयिष्यामि गेहे गेहे जने जने ॥ अन्यध
र्मास्तिरस्कृत्य पुरस्कृत्य महोत्सवं ॥१२॥ तदा नाहं हरेर्दासो लोके त्वांच प्रवर्त्तये ॥ त्वदु
न्विताश्च ये जीवा भविष्यंति कलाविह ॥१३॥ पापिनोपि गमिष्यंति निर्भयाः कृष्णमं
दिरं ॥ येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी ॥१४॥ न ते पश्यंति कीनाशं स्वप्नेप्यम
लमूर्त्तयः ॥ न प्रेतो न पिशाचो वा राक्षसो वासुरोपि वा ॥१५॥ भक्तियुक्तमनस्कानां
स्पर्शनेपि प्रभुर्भवेत् ॥ न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा ॥१६॥ हरिर्हि साध्यते भ
क्त्या प्रमाणं तत्र गोपिका ॥ नृणां जन्मसहस्रेषु भक्तौ प्रीतिर्हि जायते ॥१७॥ कलौ भ
क्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः ॥ भक्तद्रोहकरा ये च ते सीदंति जगत्त्रये ॥१८॥
दुर्वासा दुःखमापन्नो हरिभक्तविनिंदकः ॥ अलं व्रते रलं तीर्थै रलं योगै रलं मखै
अलं ज्ञानकथालापै भक्तिरेवैकमुक्तिदा ॥ इति नारदनिर्णीतं स्वमाहात्म्यं निश
म्य सा ॥२०॥ सर्वांगपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् ॥ भक्तिरुवाच ॥ अहो नारद
धन्योसि प्रीतिस्ते मयि निश्चला ॥२१॥ त्वदिचान्न विमुंचामि चित्ते स्थास्यामि सर्वदा कृ
पालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात् ॥२२॥ पुत्रयोश्चेतना नास्ति तस्मात्तो बो
धय निबोधय ॥ सूत उवाच ॥ तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः ॥ तयोर्बोध

नमारेभेकराज्ञेरा विमर्द्दयन् ॥ मुखं संयोज्य कर्णांते रामनामोच्चैः समुच्चरन् ॥२४॥ ज्ञानवृ
बुध्यतां शीघ्रं रे वैराग्य विबुध्यतां ॥ वेदवेदांतघोषैश्च गीतापाठैर्मुहुर्मुहुः ॥२५॥ बोध्य
मानौ तदा ते न कंपं चिच्चेष्टितौ बलात् ॥ नेत्रैरनवलोकंतौ जृंभमाणौ च सालसौ ॥२६
बकवत्पलितौ व्याप्तः क्षुत्क्षामौ समागकौ ॥ [illegible] तद्दांतौ निरीक्ष्यैव पुनः स्वापपरा
परौ ॥२७॥ अभि चिंतातुरो यातः किं विधेयं मयेति च ॥ अहो निद्रा कथं याति वृद्धत्वं च
महत्तरं ॥२८॥ चिंतयन्निति गोविंदं स्मारयामास भार्गव ॥ व्योमवाणी तदेवाभूत् मात्र
बै खिद्यतामिति ॥२९॥ उद्यमः सफलस्तेयं भविष्यति न संशयः ॥ एतदर्थं तु सत्कर्म
सुरर्षे त्वं समाचर ॥३०॥ तत्ते कामममभिधास्यंति साधवः साधुभूषणाः ॥ सत्कर्मणि कृ
ते तस्मिन् सा निद्रा वृद्धता तयोः ॥ गमिष्यति द्वारा द्रुक्तिः सर्वतः प्रसरिष्यति ॥ इत्या
काशवचः स्पष्टं तत्सर्वैरपि विश्रुतं ॥३२॥ नारदो विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन् ॥
श्रीनारद उवाच ॥ अनयाकाशवाण्यापि गोप्यत्वेन निरूपितं ॥३३॥ किं वा तत्साध
नं कार्यं येन कार्यं भवेत्तयोः ॥ क्व भविष्यति ते संतः कथं दास्यंति साधनं ॥ मयात्र किं
प्रकर्त्तव्यं यदुक्तं व्योमभाषया ॥ सूत उवाच ॥ तत्र तावपसंस्थाप्य निर्गतो नारदो
मुनिः ॥३५॥ तीर्थं तीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्वरान् ॥ वृत्तांतः श्रूयते सर्वैः
किंचिन्निश्चित्य चोच्यते ॥३६॥ नासाध्यं केचन प्रोचुः दुर्जेयमिति चापरे ॥ मूकीभू

नेत्रमूसंबोध्य चानयत् ॥१७॥ दीक्षिते नारदेनाथ दत्तासनमनुत्तमं ॥ कुमारा वंदिताः सर्वैः नि
षेदुः कृष्णतत्पराः ॥१८॥ वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारिणः ॥ मुख्यभागे स्थितास्ते च
तदग्रे नारदस्थितः ॥१९॥ एकभागे ऋषिगणास्तथान्यत्र दिवौकसः ॥ वेदोपनिषदोन्यत्र ती
र्थानि त्रस्त्रियोन्यतः ॥२०॥ जयशब्दो नमःशब्दो शंखशब्दस्तथैव च ॥ चूर्णलाजाप्रसूनानां
निःक्षेपः सुमहानभूत् ॥२१॥ विमानानि समारुह्य किरंतो देवनायकाः ॥ कल्पवृक्षप्रसू
नैश्च सर्वांस्तत्र समाकिरन् ॥२२॥ एतस्मिन्नेकाग्रचित्तेषु श्रीमद्भागवतस्य च ॥ माहात्म्यमूचिरे स्प
ष्टं नारदाय महात्मने ॥२३॥ कुमारा ऊचुः ॥ अथ ते संप्रवक्ष्यामो महिमा शुकशास्त्रजः ॥ यस्य
श्रवणमात्रेण मुक्तिः करतले स्थिता ॥२४॥ सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा ॥ यस्याः श्र
वणमात्रेण हरिश्चित्तं समाश्रयेत् ॥२५॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ परीक्षि
च्छुकसंवादः शृणु भागवते च तत् ॥२६॥ तावत्संसारचक्रेस्मिन् भ्रमतेज्ञानतः पुमान् ॥ या
वत्कर्णगता नास्ति शुकशास्त्रकथा क्षितौ ॥२७॥ किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः ॥
एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ॥२८॥ कथा भागवतस्यापि नित्यं भवति यद्गृहे ॥ तद्गृ
हं तीर्थरूपं च सतां पापप्रनाशनं ॥२९॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ शुकशा
स्त्रकथायाश्च कलां नार्हंति षोडशीं ॥३०॥ ताव[illegible]पानि देहेस्मिन् निवसंति तपोधनाः ॥ या
वन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ॥३१॥ न गंगा न गया काशी पुष्करं न प्रयागकं ॥ शु
कशास्त्रकथायाश्च फलेन समतां नयेत् ॥३२॥ नित्यं भागवतं यस्तु पुराणं पठते नरः ॥ प्रत्यक्ष

र्मं भवेत्तस्य कपिलादानजं फलं ॥३२॥ श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवं ॥ पठस्व स्वमु-
खेनैव यदिच्छसि परां गतिं ॥३३॥ वेदादि वेदमाता च पौरुषं सूक्तमेव च ॥ त्रयी भागवतं चैव द्वा-
दशाक्षरमेव च ॥३४॥ द्वादशात्मा प्रयागं च कालः संव[illegible]त्मकः ॥ ब्राह्मणाश्चाग्निहोत्रं
च सुरभी द्वादशी तथा ॥३५॥ तुलसी च वसंतश्च पुरुषो[illegible]एव च ॥ एतेषां तत्वतः प्राज्ञैः न पृ-
थग्भाव इष्यते ॥३६॥ यस्तु भागवतं शास्त्रं वाचयेदर्थतो निशं ॥ जन्मकोटिकृतं पापं नश्य-
ते नात्र संशयः ॥३७॥ श्लोकार्द्धं श्लोकपादं वा पठे[illegible]भागवतं च यः ॥ नित्यं पुण्यमवाप्नो-
ति राजसूयाश्वमेधयोः ॥३८॥ उक्तं भागवतं नित्यं कृतं च हरिपूजनं ॥ तुलसीपोषणं चैव
धेनूनां सेवनं समं ॥३९॥ अंतकाले तु येनैव श्रूयते शुकशास्त्रवाक् ॥ प्रीत्या तस्यैव
वैकुंठं गोविंदो पि प्रयच्छति ॥४०॥ हेमसिंहयुतं चैतद्ब्राह्मणायाददाति यः ॥ कृष्णेन सह सायु-
ज्यं स पुमान्लभते ध्रुवं ॥४१॥ आजन्ममात्रमपि येन शठेन किंचित् ॥ चित्तं विधाय शु-
ककशास्त्रकथा न पीता ॥ चांडालवच्च खरवद्वत तेन नीतं मिथ्या स्वजन्म जननीजनि
दुःखभाजा ॥ जीवच्छवो निगदितः स तु पापकर्मा येन श्रुतं शुककथावचनं न किंचित्
धिक्तं नरं पशुसमं भुवि भाररूपं एवं वदंति दिवि देवसरोजमुख्याः ॥४३॥ दुर्लभैव क-
था लोके श्रीमद्भागवतोद्भवा ॥ कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ॥४४॥ तेन
योगनिधे धीमन् श्रोतव्या सा प्रयत्नतः ॥ दिनानां नियमो नास्ति सर्वदा श्रवणं मतं ॥४५

सत्येन ब्रह्मचर्येणाप्यद्भ्याभ्यवरां स्मृतं ॥ अशक्यत्वात्कलौ बोध्यो विशेषो त्र फलकाजय ॥४६
मनस श्चाजया [illegible] द्रोगात्प्रसंगाच्चैवाप्यवद्योषात् ॥ कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतं
॥४७॥ मनोवृत्तिजयश्चैव नियमाचरणं तथा ॥ दीक्षां कर्तुं च शक्यस्यात्सप्ताहः श्रवणं
ध्रुवतः ॥४८॥ श्रद्धातः श्रवणान्नित्यं माघे तावद्धि यत्फलं ॥ तत्फलं शुकदेवेन सप्ताहश्र
वणे कृतं ॥४९॥ यत्फलं नास्ति तपसा न योगेन समाधिना ॥ अनायासेन तत्सर्वं सप्ताहश्र
वणे लभेत् ॥५०॥ यज्ञाद्गर्जति सप्ताहो ज्ञानात् ध्यानाच्च गर्जति किं ब्रूमो गर्जनं तस्य रे
गर्जति गर्जति ॥ यज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् तपसो गर्जति प्रोच्चैस्तीर्थे
भ्यो हि गर्जति ॥ शौनक उवाच ॥ साश्चर्यमेतत्कथितं कथानकं ॥ ज्ञानादिधर्मान्न
विगणय्य सांप्रतं ॥ निःश्रेयसे भागवतं पुराणं जातं कुतो वेदविदादिसूचकं ॥५१॥ सूत उ
वाच ॥ यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः ॥ एकादशं परं श्रुत्वा ह्युद्धवो वाक्यमब्रवी
त् ॥ उद्धव उवाच ॥ त्वं तु यास्यसि गोविंद भक्तकार्यं विधाय च ॥ मच्चित्ते महती चिंता तां श्रु
त्वा सुखमावह ॥५३॥ आगतोयं कलिर्घोरो भविष्यंति नराः खलाः ॥ तत्संगेनैव संतोपि
गमिष्यन्त्युग्रतां सदा ॥५४॥ तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् ॥ अन्यो न दृश्यते
त्राता त्वत्तः कमललोचन ॥५५॥ अतः सत्सु दयां कृत्वा भक्तवत्सल तां व्रज ॥ भक्तार्थं स
गुणो जातो निराकारोपि चिन्मयः ॥५६॥ त्वद्वियोगेन ते भक्ताः कथं स्थास्यंति भूतले ॥५

13

दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च ॥ कामक्रोधजयार्थं च कलौ धर्मोयमीरितः

व१

ना०भा
८

14

निर्गतोपासने कष्टमतः किंचिद्विचारय ॥५७॥ इत्युद्धववचः श्रुत्वा प्रभासे चिंतयद्धरिः ॥ भक्तावलं
बनार्थाय किं विधेयं मयेति च ॥५८॥ स्वकीयं यद्भवेत्तेजः तच्च भागवतेव्यधात् ॥ तिरोधाय
प्रविष्टोयं श्रीमद्भागवतार्णवे ॥५९॥ तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्त्तते हरेः ॥ सेवनात् श्र
वणात् पाठात् दर्शनात् पापनाशनी ॥६०॥ सप्ताहश्रवणं तेन सर्वेभ्योप्यधिकं कृतं ॥ साध
नानि तिरस्कृत्य कलौ धर्मोयमीरतः ॥६१॥ अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा ॥ कथं
त्याज्या भवेत् पुंभिः सप्ताहोतः प्रकाशितः ॥६२॥ सूत उवाच ॥ एवं नगाहश्रवणोरुधर्मे
प्रकाश्यमाने ऋषिभिः सभायां ॥ आश्चर्यमेकं समभूत्तदानीं तदुच्यते संशृणु शौनक
त्वं ॥६३॥ भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाविरासीत् ॥ श्रीकृष्ण गोविंद हरे
मुरारे नाथेति नामानि मुहुर्वदंती ॥६४॥ तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः स
दस्याः कथं प्रविष्टा कथमागतेयं मध्ये मुनीनामिति तर्कयंतः ॥६५॥ उचुः कुमाराः वचनं त
दानीं कथार्थतो निष्पतिताधुनेयं ॥ एवं गिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा ॥६६
भक्तिरुवाच ॥ भद्भिरद्यैकृतास्मि पुष्टा कलिःप्रनष्टा हि कथारसेन ॥ क्वाहं तु तिष्ठाम्य
धुनाब्रुवंतु ब्राह्मा इदं तां सखमूचिरे ते ॥६७॥ भक्तेषु गोविंदस्वरूपकर्त्री प्रेमैक[illegible]त्री भ
वरोगहंत्री सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरंतरं वैष्णवमानसानि ॥६८॥ ततोपि दोषाः
कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोपि लोके ॥ एवं तदा सावसरेपि भक्तिः तदा निविष्टा ह
रिदासचित्ते ॥ सकलभुवनमध्ये निर्द्धनास्तेपि धन्या निवसति हृदि येषां श्रीहरेर्भक्ति

च

राम
८

रेषा ॥ हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥७०॥ ब्रूमहे
ते किमधिकं महिमानमेतं ब्रह्मात्मकस्य भुवि भागवताभिधस्य ॥ यत्संश्रयान्निग
दितेलभतेसुवक्ता श्रोतापि कृष्णपदवीमलमन्यधर्मैः ॥७१॥ इति श्रीपद्मपुराणे उत्तरख
ण्डे श्रीभागवतमाहात्म्यनिरूपणो तृतीयोऽध्यायः ॥३॥ श्रीसूत उवाच ॥ अथ वैष्णवचित्ते
षु दृष्ट्वा भक्तिमलौकिकीं ॥ निजलोकं परित्यज्य भगवान् भक्तवत्सलः ॥ त्रिभंगीललितश्चारुकौ
स्तुभेन विराजितः ॥ कोटिमन्मथलावण्यो हरिश्चंदनचर्चितः ॥ वनमाली घनश्यामः पीतवासा
मनोहरः ॥ कांचीकलापरुचिरोल्लसन्मकरकुंडलः ॥ परमानंदचिन्मूर्तिर्मधुरो मुरलीधरः ॥
आविवेश स्वभक्तानां हृदयान्यमलानि च ॥३॥ वैकुंठवासिनो ये च वैष्णवा उद्धवादयः ॥ तत्कथाश्र
वणार्थं ते गूढरूपेण संस्थिताः ॥४॥ तदा जयजयारावो रसपुष्टिरलौकिकी ॥ चूर्णप्रसूनवृष्टि
श्च मुहुः शंखरवोऽप्यभूत् ॥५॥ सत्सभासंस्थितानां च देहगेहात्मविस्मृतिः ॥ दृष्ट्वा च तन्मयावस्थां
नारदो वाक्यमब्रवीत् ॥६॥ अलौकिकोऽयं महिमा मुनीश्वराः सप्ताहजन्योऽद्य विलोकितो
मया ॥ मूढाः शठा ये पशुपक्षिणोऽत्र सर्वेऽपि निष्पापतमा भवंति ॥७॥ अतो नृलोके ननु ना
स्ति किंचित् चित्तस्य शोधाय कलौ पवित्रं ॥ अघौघविध्वंसकरी कथैव कथासमानं भुवि ना
स्ति किंचित् ॥ के के विशुद्ध्यंति वदंतु मह्यं सप्ताहयज्ञेन कथामयेन ॥ कृपालुभिर्लोकहितं विचा
र्य प्रकाशितो कश्च नवीनमार्गः ॥८॥ कुमारा ऊचुः ॥ ये मानवाः पापकृतोऽपि सर्वदा सदा दुराचा
ररता विमार्गगाः ॥ क्रोधाग्निदग्धाः कुटिलाश्च कामिनः सप्ताहयज्ञेन कलौ पुनंति ते ॥९॥ सत्ये

15

नहीनापितृमातृदुःखकाःतथाकृतघ्नाचाश्रमधर्मवर्जिताः॥ येदांभिकामत्सरिणोपिहिंसकास
प्राहयज्ञेनकलौव्रजंति॥११॥ येचोग्रपापाघ्नकारिणाः क्रूरामिथ्याचारविनिर्दयाश्चये॥ ब्रह्म
स्वपरस्त्रीव्यभिचारकारिणाःसप्राहयज्ञेनकलौव्रजंतिते॥१२॥ कायेनवाचामनसापियातकंनि
त्यंप्रकुर्वंतिपापमहठेनये॥ परस्वपरस्त्रीमलिनोदुरात्मासप्राहयज्ञेनकलौव्रजंतिते॥१३॥ अत्रते
कीर्तयिष्यामिइतिहासंपुरातनं॥ यस्यश्रवणमात्रेणपापहानिपरंभवेत्॥१४॥ तुंगभद्रातटेपू
र्वमभूत्पत्तनमुत्तमं॥ यत्रवर्णाःस्वधर्मेणसत्यसत्कर्मतत्पराः॥१५॥ आत्मदेवःपुरेतस्मिन्स
र्ववेदविशारदः॥ श्रौतस्मार्तेषुसंपन्नोद्वितीयइवभास्करः॥ भिक्षुकोवित्तवान्लोकेतत्प्रिया
धुंधलीस्मृता॥१६॥ स्ववाक्यस्थापकानित्यंसुंदरीसुकुलोद्भवा॥१७॥ लोकवार्तारताक्रूरा
प्रायसोबहुजल्पका॥ शूराचगृहकृत्येषुकृपणाकलहप्रिया॥१८॥ एवंनिवसतोप्रेम्णादंप
त्योरनपत्ययोः॥ अर्थाःकामास्तयोरासन्नसुखायगृहादिकं॥ पश्चाद्धर्माःसमारब्धास्ताभ्यां
संतानहेतवे॥ गोभूहिरण्यवासांसिद्विजेभ्योयच्छतोसदा॥२०॥ धनार्द्धंधर्ममार्गेणताभ्यां
नीतंतथापिच॥ नपुत्रोनापिवापुत्रीततश्चिंतातुरोभृशं॥२१॥ एकदासद्विजोदुःखाद्गृहंत्यक्त्वा
गतोवनं॥ मध्याह्नेतृषितोजातस्तडागंसमुपेयिवान्॥२२॥ पीत्वाजलंनिषण्णस्तुप्रजा
दुःखेनकर्षितः॥ मुहूर्तादपितत्रैवसंन्यासीकश्चिदागतः॥ दृष्ट्वापीतजलंतंतुविप्रोजातस्तदं
तिके॥ ननामपादयोस्तस्यनिःश्वसन्संस्थितःपुरः॥२४॥ यतिरुवाच॥ कथंरोदिषिविप्र
त्वंकातेचिंताबलीयसी॥ वदत्वंसत्वरंमह्यंस्वस्यदुःखस्यकारणं॥२५॥ ब्राह्मणउवाच॥

किंब्रवीमि[illegible]स्तवे दुःखं पूर्वपापेन संचितं॥ मदीयपूर्वजास्तोयं कवोष्णमुपभुंजते॥२६॥ मद्दत्तं ने
व गृह्णंति प्रीत्या देवा द्विजातयः॥ प्रजादुःखेन शून्योहं प्राणांस्त्यक्तुमिहागतः॥२७॥ धिग्जीवि
तं प्रजाहीनं धिग्गृहं च प्रजांविना॥ धिग्धनं चानपत्यस्य धिक्कुलं संततिं विना॥२८॥ पाल्य
ते या मया धेनुः सा वंध्या सर्वथा भवेत्॥ यो मया रोपितो वृक्षः सो वि वंध्यत्वमाव्रजेत्॥२९॥ य
त्फलं मद्गृहायातं शीघ्रं तच्च विनश्यति॥ निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे॥३०॥
इत्युक्त्वा स रुरोदोच्चैः तत्पार्श्वे दुःखपीडितः॥ तदा तस्य यतेश्चित्ते करुणाभूद्गरीयसी॥३१॥ तद्भा
लाक्षरमालां च वाचयामास योगवान्॥ सर्वं ज्ञात्वा यतिः पश्चात् विप्रमूचे सविस्तरं॥३२॥ य
तिरुवाच॥ शृणु विप्र मया तेद्य प्रारब्धं तु विलोकितं॥ सप्तजन्मावधि चैव पुत्रो नैव च नैव
च॥३३॥ मुंचाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः॥ विवेकं तु समाश्रित्य त्यज संसारवास
नां॥३४॥ संततेः सगरो दुःखमवापांगः पुरा तथा॥ रेज्यो चाशां कुटुंबस्य सन्यासे सर्वथा सुखं॥३५॥
ब्राह्मण उवाच॥ विवेकेन भवेत्किं मे पुत्रं देहि बलादपि॥ नो चेत्त्यजाम्यहं प्राणान् त्वदग्रे शोक
मूर्छितः॥३६॥ पुत्रादिसुखहीनोयं सन्यासः शुष्क एव हि॥ गृहस्थः सरसो लोके पुत्रपौत्रसमावृतः
॥३७॥ इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः॥ चित्रकेतुर्गतः कष्टं विधिलेखविमार्जनात्॥३
न यास्यसि सुखं पुत्राद्यथा देवहतोद्यमः॥ अतो हठेन युक्तोसि ह्यर्थिने किं वदाम्यहं॥३९॥ त
स्याग्रहं समालोक्य फलमेकं तु दत्तवान्॥ इदं भक्ष्य पत्न्यै त्वं ते न पुत्रो भविष्यति॥४०॥ सत्यं
शौचं दया दानमेकभक्तं तु भोजनं वर्षावधि स्त्रिया कार्यं तेन पुत्रोतिनिर्मलः॥४१॥ एवमुक्त्वा

के ६

17

मा॰मा॰
११

यशोयोऽसौ विप्रस्तुऽगृहमागतः॥ पत्न्याः पार्श्वे फलं दत्वा स्वयं यातः कुत्रचित्॥४२॥ ततः सा कुटि-
लातस्य सख्यग्रे च कृतो दहा॥ अहो चिंता ममोत्पन्ना फलं चाहं न भक्षये॥४३॥ फलभक्षेण गर्भस्या-
द्गर्भेरोगोदरवृद्धिता॥ स्वल्पं भक्ष्यं ततो शक्तिः गृहकार्यं कथं भवेत्॥४४॥ दैवा[illegible] द्धाटी व्रजेद्ग्रामे प-
लायिं जरा कथं॥ शुकवन्निवसेद्गर्भं तं कुक्षौ कथमुत्सृजे॥४५॥ तिर्यग्गर्वीऽऽगतो गर्भस्तदा मे
मरणं भवेत्॥ प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे॥४६॥ मंदायामपि सर्वस्वं न[illegible] नंदा संहरे
तदा॥ सत्यशौचादिनियमैः दुःसाध्यः स दृश्यते॥ लालने पालने दुःखं प्रसूतायाश्च विद्यते॥ वंध्या
वा विधवा नारी सुखनी चेति मे मतिः॥४७॥ एवं कुतर्कयोगेन तत्फलं नैव भक्षितं॥ पत्या च पृष्टं
फलं भक्तं भक्तं चेति तयेरितं॥४८॥ एकदा भगिनी तस्यास्तद्गृहे स्वेच्छयागता॥ तदग्रे कथि-
तं सर्वं चिंतितं यं महतीति मे॥५०॥ दुर्बलाऽतेन दुःखेन च न जे करवाणि किं॥ साब्रवीन्मम गर्भोस्ति
तं दास्यामि प्रसूतितः॥५१॥ तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखं॥ वित्तं त्वं मत्पतेश्चाप्य सं
तदास्यति बालकं॥५२॥ षण्मासिको मृतो बाल इति लोके वदिष्यति॥ तं बालं पोषयिष्या-
मि नित्यमागत्य ते गृहे॥५३॥ फलं भक्षय धेनोस्त्वं परिक्षार्थं तु सांप्रतं॥ तत्तदाचरितं सर्वं तयै-
व स्त्रीस्वभावतः॥५४॥ अथ कालेन सा नारी प्रसूता बालकं तदा॥ आनीय जनको बालं रहस्ये
धुंधुलीददौ॥५५॥ तया च कथितं भर्त्रे प्रसूतः सुखमर्भकं॥ लोकस्य सुखमुत्पन्नं आत्मदेवप्रजोदया-
त्॥५६॥ ददौ दानं द्विजातिभ्यो जातकर्म विधाय च॥ गीतवादित्रघोषोभूत्तद्द्वारे मंगलं बहु॥५७
भर्त्रग्रे साब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम॥ अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकं॥५८

राम
११

१८

६९३

मत्स्यस्य च प्रसूता या वाः न तो बालस्तु वर्त्तते ॥ ता मा कल्प्य गृहे स्वे सा ते [illegible] र्भ यो वपि वर्धति ॥५८॥ पति
नातत्कृतं सर्वं पुत्ररक्षा ताहे तवे ॥ पुत्रस्य धुंधुकारीति नाम मात्रा प्रतिष्ठितं ॥६०॥ त्रिमासे नि
र्गते चाथ सा धेनुः सुषुवे र्भकं ॥ सर्वांगसुंदरं दिव्यं निर्मलं कनकप्रभं ॥६१॥ दृष्ट्वा प्रसन्नो
विप्रस्तु संस्कारान्स्वयमादधे ॥ मत्वाश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः ॥६२॥ भाग्योदयो
धुनाजातआत्मदेवस्य पश्यतः ॥ धेन्वा बालः प्रसूतस्तु देवरूपीति कौतुकं ॥६३॥ न ज्ञातं त
द्रहस्यं तु केनापि विधियोगतः ॥ गोकर्णं च सुतं दृष्ट्वा गोकर्णं नाम चाकरोत ॥६४॥ कियत्का
लेन तौ जातौ तरुणौ तनयाउभौ ॥ गोकर्णः पंडितो ज्ञानी धुंधुकारी महाखलः ॥६५॥ स्ना
नशौचक्रियाहीनो दुर्भक्षी क्रोधसंयुतः ॥ दुःपरिग्रहकर्त्ता च शवहस्तेन भोजनं ॥६६॥ चौरः
सर्वजनद्वेषी परवेश्मप्रदीपकः ॥ लालनायार्भकान्धृत्वा सद्यः कूपे निपातयेत ॥६७॥ हिं
सकः शस्त्रधारी च दीनांधानां प्रपीडकः ॥ चांडालाभिरतो नित्यं पाशहस्तः श्वसंगतः ॥६८
तेन वेश्याकुसंगेन पित्र्यं वित्तं तु नाशितं ॥ एकदा पितरौ ताड्य पात्राणि स्वयमाहरत ॥६९॥ त
त्पिता कृपणः प्रोच्चैर्धनहीनो रुरोद ह ॥ वंध्यत्वं च समीचीनं कुपुत्रो दुःखदायकः ॥७०॥ क्व तिष्ठा
मि क्व गच्छामि को मे दुःखं व्यपोहयेत ॥ प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितं ॥७१॥
तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः ॥ बोधयामास जनकं वैराग्यं परिदर्शयन् ॥७२॥
असारः खलु संसारः दुःखरूपी विमोहनः ॥ कः सुतः कस्य च धनं स्नेहवान्ज्वलते निशं ॥७३
न चेंद्रस्य सुखं किंचिन्न सुखं चक्रवर्त्तिनः ॥ सुखं स्व विरक्तस्य मुनेरेकांतदर्शिनः ॥७४॥ मुं

भा०मा०
१२

चाज्ञानं व्रजाहयं मोहतो नरके गतिः॥ निपतिष्यति देहोयं सर्वं त्यक्त्वा वनं व्रज॥ तद्वाक्यं तु
समाकर्ण्य गंतुकाम पिताब्रवीत्॥ किं कर्तव्यं वने तात तत्त्वं वद सविस्तरं॥७६॥ अंधकूपे स्ने
हपाशबद्धः पंगुरहं शठः॥ कर्मणा पतितो नूनं मामुद्धर कृपानिधे॥७७॥ गोकर्ण उवाच॥ देहे
स्थिमांसरुधिरेभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुंच॥ पश्यानिशं जगदिदं क्षणभं
गनिष्ठं॥ वैराग्यरागरसिको भव भक्तिनिष्ठः॥७८॥ धर्मं भजस्व सततं त्यज लोकधर्मान्॥ से
वस्व साधुपुरुषान्जहि कामतृष्णां॥ अन्यस्य दोषगुणचिंतनमाशु मुक्त्वा सेवाकथारस
महो नितरां पिब त्वं॥७९॥ एवं सुतोक्तिवशतोपि गृहं विहाय यातो वनं स्थिरमतिर्गतषष्टिवर्षः
युक्तो हरेरनुदिनं परिचर्ययासौ श्रीकृष्णमाप नियतं दशमस्य पाठात्॥८०॥ इति श्रीपद्म
पुराणे उत्तरखंडे भागवतमाहात्म्ये चतुर्थोध्यायः॥४॥ सूत उवाच॥ पितर्युपरते तेन जन
नी ताडिता भृशं॥ क्व वित्तं तिष्ठते ब्रूहि हनिष्ये लत्तया न चेत्॥१॥ इति तद्वाक्यसंत्रासाज्जनन्या
पुत्रदुःखतः॥ कूपपातः कृतो रात्रौ तेन सा निधनं गता॥२॥ गोकर्णस्तीर्थयात्रार्थं निर्गतो यो
गसंस्थितः॥ न दुःखं न सुखं तस्य न वैरी नापि बांधवः॥३॥ धुंधुकारी गृहेतिष्ठत्पंचपण्यव
धूवृतः॥ अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः॥४॥ एकदा कुलटास्तास्तु भूषणान्यभि
लिप्सवः॥ तदर्थं निर्गतो गेहात्कामांधो मृत्युमस्मरन्॥५॥ यतस्ततश्च संहृत्य वित्तं वेश्म
पुनर्गतः॥ ताभ्योयच्छत्सुवस्त्राणि भूषणानि कियंति च॥६॥ बहुवित्तचयं दृष्ट्वा रात्रौ ना
र्यो विचारयन्॥ चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति॥७॥ वित्तं हृत्वा पुनश्चैनं मा
रयिष्यति निश्चितं॥ अतोर्थगुप्तये गूढमस्माभिः किं न हन्यते॥८॥ निहत्यैनं गृहीत्वार्थं यास्यामो

20

राम
१२

यत्र कुचित्॥ इति ताः निश्चयं कृत्वा सुप्तं संबध्य रश्मिभिः॥९॥ पाशं कंठे निधायास्य तन्मृत्युमुप
चक्रमुः॥ त्वरितं न ममारासौ चिंतायुक्तास्तदाभवन्॥१०॥ तप्तांगारसमूहांश्च तन्मुखे हि विचि
क्षिपुः॥ अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः॥११॥ तं देहं मुमुचुर्गर्त्ते प्रायः साहसिका
हसिकास्त्रियः॥ न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः॥१२॥ लोके पृष्टा वदंति स्म दूरं या
तो प्रियो हि नः॥ आगमिष्यति वर्षेस्मिन् वित्तलोभविकर्षितः॥१३॥ स्त्रीणां नैव तु विश्वासो दुष्टा
नां कारयेद्बुधः॥ विश्वासे यः स्थितो मूढः स दुःखैः परिभूयते॥१४॥ सुधामयं वचो यासां कामिनां
रसवर्द्धनं॥ हृदयं क्षुरधाराभं प्रियः को नाम योषितां॥१५॥ संहृत्य वित्तं ता याताः कुलटा बहु
भर्तृकाः॥ धुंधुकारी बभूवाथ महान्प्रेतः कुकर्मतः॥१६॥ वात्यारूपधरो नित्यं धावन्दशदिशों
तरं॥ शीतातपपरिक्लिष्टो निराहारः पिपासितः॥१७॥ न लेभे शरणं कुत्र हा दैवेति मुहुर्वदन्॥ कि
यत्कालेन गोकर्णो मृतं लोकादबुध्यत॥१८॥ अनाथं तं विदित्वैवं गयाश्राद्धमचीकरत्॥ यस्मिंस्
तीर्थे तु संयाति तत्र श्राद्धमवर्त्तयत्॥१९॥ एवं भ्रमन्स गोकर्णः स्वपुरं समुपेयिवान्॥ रात्रौ गृहां
गणे स्वप्तुमागतो लक्षितो परैः॥२०॥ तत्र सुप्तं स विज्ञाय धुंधुकारी स्वबांधवं॥ निशीथे दर्शयामा
स महारौद्रतरं वपुः॥२१॥ सकृन्मेषः सकृद्धस्ती सकृच्च महिषोभवत्॥ सकृदिंद्रः सकृच्चाग्निः
पुनश्च पुरुषोभवत्॥२२॥ वैपरीत्यमिदं दृष्ट्वा गोकर्णो धैर्यसंयुतः॥ अयं दुर्गतिकः कश्चित् नि
श्चित्याथ तमब्रवीत्॥२३॥ गोकर्ण उवाच॥ कस्त्वमुग्रतरो रात्रौ कुतो यातो दशामिमां॥ किं वा प्रे
तः पिशाचो वा राक्षसोसीति शंस नः॥ सूत उवाच॥ एवं पृष्टस्तदा तेन रुरोदोच्चैः पुनः पुनः॥ अशक्त

वचनोच्चारे संज्ञामात्रं चकार ह ॥ ततोंजलौ जलं कृत्वा गोकर्णास्तमुदीरयन् ॥ तत्सेकात्तु गतपा
पो सौ प्रवक्तुं प्रचक्रमे ॥२६॥ प्रेत उवाच ॥ अहं भ्राता त्वदीयोस्मि धुंधुकारीति नामतः ॥ स्वकी
येनैव दोषेण ब्रह्मत्वं नाशितं मया ॥२७॥ कर्मणां नास्ति संख्या मे महाज्ञानविमोहितः ॥ लोकानां
हिंसको सोहं स्त्रीभिर्दुःखेन मारितः ॥२८॥ अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहं ॥ वाताहारेण जी
वामि दैवाधीनफलोदयः ॥२९॥ अहो बंधो कृपासिंधो भ्रात मामाशु मोचय ॥ गोकर्णो वच
नं श्रुत्वा तस्मै वाक्यमथाब्रवीत ॥३०॥ गोकर्ण उवाच ॥ त्वदर्थं हि गयापिंडो मया दत्तो विधा
नतः ॥ तत्कथं नैव मुक्तोसि ममाश्चर्यमिदं महत् ॥३१॥ गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्वि
ह ॥ किं विधेयं मया प्रेत तत्त्वं वद सविस्तरं ॥३२॥ प्रेत उवाच ॥ गयाश्राद्धशतेनापि मुक्तिर्मे न भवि
ष्यति ॥ उपायमपरं किंचित्त्वं विचारय सांप्रतं ॥३३॥ इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः ॥
शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव ॥३४॥ इदानीं तु निजं स्थानमातिष्ठ प्रेत निर्भयः ॥ त्वन्मु
क्तिसाधनं किंचिदाचरिष्ये विचार्य च ॥३५॥ धुंधुकारी निजस्थानं तेनादिष्टस्ततो गतः ॥ गोक
र्णः चिंतयामास तां रात्रिं न तदध्यगात ॥३६॥ प्रातस्तमागतं दृष्ट्वा लोकाः प्रीत्या समागताः ॥ तत्सर्वं
कथितं तेन तज्जातं च यथा तथा ॥३७॥ विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः ॥ तन्मुक्तिं नैव
पश्यंति पश्यंतः शास्त्रसंचयान् ॥३८॥ ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ स्थापितं परं ॥ गोकर्णः स्तंभ
नं चक्रे सूर्यवेगस्य वै तदा ॥३९॥ तुभ्यं नमो जगत्साक्षिन् ब्रूहि मे मुक्तिहेतुकं ॥ तच्छ्रुत्वा दूरतः
सूर्यः स्फुटमित्यभिभाषत ॥४०॥ श्रीमद्भागवतान्मुक्तिः सप्ताहं वाचनं कुरु ॥ इति सूर्यवचः सर्वैः

ध्येनिरूपंतं तु विस्तृतं ॥४१॥ सर्वेषु श्रृन्वत्सु तत्रैनकर्तव्यं भक्तं करं त्विदं ॥ गोकर्णोनिश्चयं कृत्वा वाचने
पंप्रवर्त्तितः ॥ तत्रसंश्रवणार्थाय देशाग्रामजना ययुः ॥ पंगवंधवृद्धमंदाश्च तेपि पापक्षयाय वै ॥४३
समाजस्तु महान्जातो देवविस्मयकारकः ॥ यदैवासनमास्थाय गोकर्णो कथयत्कथां ॥४४॥
स प्रेतोपि तदा यातस्थानं पश्यन्नितस्ततः ॥ सप्तग्रंथियुतं तत्र पश्यन्नुच्चकमस्थितं ॥४५॥ तन्मू
लछिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ ॥ वातरूपी स्थितं कर्तुं न शक्तो वंशमाविशत् ॥४६॥ वै
ष्णवं ब्राह्मणं तां मुख्यं श्रोतारं परिकल्प्य सः ॥ प्रथमस्कंधतस्पष्टं व्याख्यानं धेनुजो करोत ॥४७॥
दिनांते रक्षिता गाथा तदा चित्रं वभूव ह ॥ वंशैकग्रंथिभेदोभूत्सशब्दो पश्यतां सतां ॥४८॥ द्वितीये
येह्नि तथा सायं द्वितीयग्रंथिभेदनं ॥ त्रितीयेह्नि तथा सायं तृतीयग्रंथिभेदनं ॥४९॥ एवं सप्तवैरा [दिनैः]
सप्तग्रंथिविभेदनं ॥ कृत्वापि द्वादशस्कंधश्रवणात्प्रेततां जहौ ॥५०॥ दिव्यरूपधरो जातः तुलसी
दाममंडितः ॥ पीतवासा घनश्यामो मुकुटी कुंडलान्वितः ॥५१॥ ननाम भ्रातरं सद्यो गोकर्ण
र्णमिति चाब्रवीत् ॥ त्वयाहं मोचितो बंधो कृपया प्रेतकश्मलात् ॥५२॥ धन्या भागवती वार्ता प्रेत
पीडाविनाशनी ॥ सप्ताहोपि तथा धन्यः कृष्णलोकफलप्रदः ॥५३॥ कंपंते सर्वपापानि सप्ताहश्र
वणे कृते ॥ अस्माकं प्रलयः सद्यो कथेयं च करिष्यति ॥ आर्द्रं शुष्कं लघु स्थूलं वाङ्मनः कर्मभि
भिः कृतं ॥ श्रवणं विदहेत्पापं पावकः समिधो यथा ॥५५॥ अस्मिन्वै भारते वर्षे सूरिभिर्देवसं
सदि ॥ अकथाश्राविणां पुंसां निःफलं जन्म कीर्तितं ॥५६॥ किं मोहतो रक्षितेन सुपुष्टेन वलीय
सा ॥ अध्रुवेण शरीरेण शुकशास्त्रकथां विना ॥५७॥ अस्थिस्तंभं स्नायुवद्धं मांस... शोणिता

का

भा.मा.
१४

तत्लेपितं ॥ च भीव नर्द्ध दुर्धधंपात्रं मूत्र पुरीषयोः ॥५८॥ जराव्यो कविपार्थतेन मंदिर मातुरं ॥ दुःप्र
र्दुग्धं दूषं सदोष हृता मंडुरं ॥५९॥ कामि विट् मस्म संजातं पारीरमिति वर्णितं ॥ अस्थिरे रा
स्थिरं कर्मकृतोपं साधयेन्न हि ॥६०॥ तत्रातः संस्कृतं चान्नं सापंतत्र विनश्यति ॥ तदीय रस
संपुष्टो कापका नाम निर्त्यता ॥६१॥ सप्राह अवरा लोके प्राप्यते निकटे हरिः ॥ कलिदोषनि
वृत्यर्थं एतदेव हि साधनं ॥६२॥ वुद्बुदा इव तोयेषु मशका इव जंतुषु ॥ जायंते मारणायेव कर्मणा
अवरा न जिता ॥६३॥ जड्स्य मष्क वरास्य मूर्कं पि विभेदनं ॥ चित्रं किमत्र तदा चित्तं जं
पि [illegible] दकं प्राप्य वातुर्धा ॥ भिद्यते हृदयग्रंथि [illegible] छिद्यंते सर्व संशयाः ॥ क्षीयंते सर्व क
र्माणि सप्राह अवरो कृते ६५ ॥ संसार कर्दमालेप प्रक्षालन पटीयसी ॥ कथा तीर्थस्थि
ते चित्ते मुक्तिरेव बुधेरुता ॥६६॥ एवं वदति वै तस्मिन् विमानमपेतत्तदा ॥ वैकुंठवासिभिर्हृ
ष्ट प्रस्फूरद्दीप्ति मंडलं ॥६७॥ सर्वे श्रोतारो पश्यता भेजे विमानं धुंधुलीसुतः ॥ विमाने वैष्णवान्वी
क्ष्य गोकर्णो वाक्यमब्रवीत् ॥६८॥ गोकर्ण उवाच ॥ अत्रैव बहवः संति श्रोतारो मम निर्मला
आनीतानि विमानानि तेषां न युगपत्कुतः ॥६९॥ श्रवणं समभागेन सर्वेषामिह दृश्यते ॥ फल
भेदकुतो जातः प्रब्रुवंतु हरिप्रियाः ॥७०॥ पार्षदा ऊचुः ॥ श्रवणस्य विभेदेन फलभेदोपि संस्थि
तः ॥ श्रवणं तु कृतं सर्वैर्न तथा मननं कृतं ॥७१॥ फलभेदस्ततो जातः पुनः श्राव्य वा [illegible] गुप्तिब
से ॥ सप्तरात्रिमुपोष्यैव प्रेतेन श्रवणं कृतं ॥७२॥ मननादि तथा तेन स्थिर चित्तं कृतं [illegible]
अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतं ॥७३॥ संदिग्धो हि हतो मंत्रो व्यग्रचित्तो हतो जपः ॥ अवै

२४

५८

६४

भा.म.
१४

५५४

स वो हतो देशो हतं श्राद्ध मवैस्नवं ॥७४॥ हतमश्रोत्रियेदानं अनाचारहतं कुलं ॥ विश्वासो गुरुवा
क्येषु स्वस्मिन्दीनत्व भावना ॥७५॥ मनो देवजयश्चैव कथायां निश्चला मतिः ॥ एवमादिकृतं चे
त्स्या तदा वैश्नवरो फलं ॥७६॥ पुनः श्रवंते सर्वेषां वैकुंठे वसति ध्रुवं ॥ जो करोति नवजो विदो जो
लोकं दास्यति स्वयं ॥७७॥ एवमुक्त्वा ययुः सर्वे वैकुंठं हरिकीर्त्तनात् ॥ श्रावणो मासि जो कु[illegible]
राः कृपानुचेतया पुनः ॥७८॥ स पूरांत्रं वृती भूय श्रवणांते कृतपुनः ॥ कथासमाप्तौ यज्ञातं
श्रूयतां तच्च नारद ॥७९॥ विमानैः सहजन्केश्च हरिराविर्बभूव ह ॥ जयशब्दैर्नमशब्दैस्तत्राष्ठ
सन्नवहवस्तदा ॥८०॥ पांचजन्यध्वनिं श्रुके हर्षात्तत्र हरिः स्वयं ॥ जो करोति तु समालिंग्य श्र
करोत्स्व सदृशं हरिः ॥८१॥ श्रोतन्नन्यान् घनश्यामान् पीतकौशेयवाससः ॥ कीरीटिनः कुं
डलिनस्तथा चक्रे हरिर्दोरातं ॥८२॥ तत्रामेये स्थिता जीवा श्राश्वचांडाल जातयः ॥ विमाने स्थाप
यितास्तेपि जो करोतः कृपयातदा ॥८३॥ प्रेषिता हरिलोके ते यत्र गच्छंति योगिनः ॥ जो करोति न सजो
पालो जो लोकं जो पवल्लभं ॥८४॥ कथाश्रवणातः प्रीतो निर्भयो भक्तवत्सलः ॥ अयोध्यावासि
नः पूर्वं यथा रामेरा संगताः ॥८५॥ तथा कृष्णेन ते नीताः जो लोकं योगिदुर्लभं ॥ यत्र सूर्यस्य सो
मस्य सिद्धानां न गतिः क्वचित् ॥८६॥ तं लोकं विगतास्ते तु श्रीमद्भागवतः श्रवात् ॥ ब्रूमोद्यतेः
किं फलमेव दुर्लभं सप्ताहयज्ञेन कथासु संचितं ॥ करोति न जो करोति कृपा नरो ये पीतश्रुते गर्भजा
तानभूयः ॥८७॥ वातांबुपर्णाशन देहशोषणैस्तपोभिरुग्रैश्चिरकाल संचितैः ॥ योगैश्च संयांति
नरा न तां गतिं सप्ताहगाथा श्रवणेन यांति यां ॥८८॥ इतिहासमिमं पसांयराद्दिल्यो पि मुनीश्वरः ॥ प

भा०मा०
१५

ऽतेचित्रकूटस्थोवृंदावने द [illegible] परिप्लुतः॥१०॥ आख्यानमेतत्परमं पवित्रं श्रुतं सकृत्सं
विदहेदघौघं॥ श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपाठादपुनर्भवं यत॥११॥ इति श्रीभागवते
माहात्म्ये पद्मपुराणे उत्तरखंडे पंचमोऽध्यायः॥५॥ कृष्णार्पणमस्तु॥ अथ ते संप्रवक्ष्यामि सप्ता
हश्रवणे विधिं॥ सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः॥१॥ दैवज्ञं तु समाहूय मुहूर्तं पृच्छ्य
यत्नतः॥ विवाहे यादृशं वित्तं तादृशं परिकल्पयेत्॥ नभस्य आश्विनमाघोर्जौ मार्गशीर्षः शुचिर्न
भाः॥ एते मासाः कथारंभे श्रोतॄणां मोक्षसूचकाः॥३॥ मासानां विग्रहे यानि तानि त्याज्यानि सर्वथा॥ सह

नं०६

यास्तत्र कर्तव्यास्ते सोद्यमाश्च ये॥४॥ देशे देशे तथा सेयं वार्ता प्रेष्या प्रयत्नतः॥ भविष्यति कथा चा
त्रागंतव्यं कुटुंबिभिः॥५॥ दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः॥ स्त्रियः शूद्रादयो ये च तेषां
बोधो यतो भवेत्॥६॥ देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः॥ तेष्वेव पत्रं प्रेष्यं च तल्लेखनमि
तीरितं॥७॥ सतां समाजो भविता सप्तरात्रं सुदुर्लभः॥ अपूर्वरसरूपैव कथा चात्र भविष्यति॥८॥
श्रीभागवतपीयूषपानाय रसलंपटाः॥ भवंतश्च तथा शीघ्रमायात प्रेमतः पानतत्पराः॥९॥ नावकाशः
कदाचिच्चेद्दिनमात्रं तथापि वा॥ सर्वथागमनं कार्यं क्षणोऽत्रैव सुदुर्लभः॥१०॥ एवमाग
मनं तेषां कर्तव्यं विनयेन च॥ आगंतुकानां सर्वेषां वासस्थानानि कल्पयेत्॥११॥ तीर्थे
वा विपिने वापि गृहे वा श्रवणं स्मृतं॥ विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलं॥१२॥ शो
धनं मार्जनं भूमेर्लेपनं धातुमंडलं॥ गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत्॥१३॥ स्वीकृ
तोसि नयानाप मनुष्यैर्भवसागरो॥ मनोरथो महीकाये सकलः सर्वथा त्वया॥१४॥ निर्विघ्न

26

नैव कर्त्तव्योऽनृतो हं तव केशव॥ एवं दीनवचः प्रोक्त्वा वक्तारं चाप्यपूजयेत्॥१५॥ संभूय बा-
न्धवाद्याभिः पूजां तेनं च संस्तवेत्॥ श्रुतरूपप्रबोधज्ञ सर्वशास्त्रविशारदः॥१६॥ एतत्कथाप्र-
संगेन मद्ज्ञानं विनाशय॥ तदग्रे नियमं पश्चात्कर्त्तव्याः श्रेयसे मुदा॥१७॥ सप्तरात्रिं
पंचरात्रं कथाधारस्तीयः स एव हि॥ व्रतानां पंचविप्राणां कथाभंगनिवृत्तये॥१८॥ अवीक्ष्य
पंचाहतो यत्नात्तन्नाम्नी राशिं नियमेलयेत्॥ कर्त्तव्यो मंडपः प्रोच्चैः कदलीस्तंभमंडितः॥१९॥
फलपुष्पदलैर्विष्णुकवितानेन विराजितः॥ चतुर्दिक्षु ध्वजारोपो बहुसंपत्तविराजितः॥२०॥
ऊर्ध्वसप्तैव लोकाश्च कल्पनीयाः सविस्तरं॥ तेष्वसक्ताः विरक्ताश्च स्थापनीयाः प्र[illegible]बोधचर-
पुनं ते भाषासनानि कव्यानि यथोत्तरं॥ वक्तुश्चापि तथा दिव्यमासनं परिकल्पयेत्॥२२॥ उद-
ङ्मुखो भवेद्वक्ता श्रोता[illegible] वै प्राङ्मुखस्तथा॥ अपवा पूर्वदिङ्भागो पूज्यपूजकमध्यतः॥२३
श्रोता तत्तागमासतः प्रोक्तो देशकालादिकोविदैः॥ विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृ-
त्॥२४॥ दृष्टांतकुशलो धीरो वक्ता कार्योऽतिनिस्पृहः॥ अनेकधर्मविभ्रांताः स्त्रैणाः पाखं-
डवादिनः॥ शुकशास्त्रकथोच्चारे त्याज्यास्ते ■ पंडिताः॥२६॥ वक्तुः पार्श्वे सहायार्थमन्यः स्था-
प्यस्तथाविधिः॥ पंडितः संशयच्छेत्ता लोकबोधनतत्परः॥२७॥ वक्त्रा क्षौरं प्रकर्त्तव्यं दिनादर्वा-
क्व्रताप्तये॥ अरुणोदये निर्वृत्य शौचं स्नानं समाचरेत्॥२८॥ नित्यं संक्षेपतः कृत्वा संध्यादि प्र-
यतस्ततः॥ कथाविघ्नविघातार्थं गणनाथं प्रपूजयेत्॥२९॥ श्रीमद्भागवतं स्थापितं ततः पूजाप्र

प्रयत्नतः कर्त्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥३०॥ पितृन्संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समा-
चरेत् ॥ मंडलं च प्रकर्त्तव्यं तत्र स्थाप्यो हरिस्तथा ॥३१॥ कृष्णमुद्दिश्य मंत्रेण चरेत्पूजाविधिक्रमात् ॥
प्रदक्षिणानमस्कारान्पूजांते स्तुतिमाचरेत् ॥३२॥ संसारसागरे मग्नं दीनं मां करुणानिधे कर्म-
ग्राहगृहीतांगं मामुद्धर भवार्णवात् ॥३३॥ ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् ॥ स्तुति-
प्रसन्नचित्तेन कर्त्तव्या केवलं मुदा ॥ श्रीमद्भागवताख्यस्त्वं प्रत्यक्षः कृष्ण एव हि ॥ कर्त्तव्ये ते हरे जी-
र्णोद्धारो दश्या चर विधया ॥३५॥ ब्राह्मणान्वैष्णवानन्यांस्तथा कीर्त्तनकारिणः ॥ नत्वा सं-
पूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥३६॥ लोकवित्तधनागारपुत्रचिंतां व्युदस्य च ॥ कथाचि-
त्तः शुद्धमतिः स लभेत्फलमुत्तमं ॥३७॥ आसूर्योदयमारभ्य सार्द्धत्रिप्रहरांतिकं ॥ वाचनीया कथा
सम्यक् धीरकंठं सुधीमता ॥३८॥ कथाविरामः कर्त्तव्यो मध्याह्ने घटिकाद्वयं ॥ तत्कथामनु कार्यं
वै कीर्त्तनं वैष्णवैस्तदा ॥३९॥ मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः ॥ हविष्यान्नेन कर्त्त-
व्यो ह्येकवारं कथार्थिना ॥४०॥ उपोष्य सप्तरात्रं वै कीर्त्तनं वैष्णवैस्तदा ॥ घृतपानं पयः-
पानं कृत्वा वा शृणुयात्सुखं ॥४१॥ फलाहारेण वा भाव्यमेकभुक्तेन वा पुनः ॥ सुखसाध्यं
भवेद्यत्तु कर्त्तव्यं श्रवणाय तत् ॥४२॥ भोजनं तु वरं मन्ये कथाश्रवणकारकं ॥ नोपवा-
सवरः प्रोक्तः कथा [illegible] विघ्नकरो यदि ॥४२॥ सप्ताहव्रतिनां पुंसां नियमान्शृणु ना-
रद ॥ विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥४३॥ ब्रह्मचर्यमधःसुप्तिः पत्रावल्यां

२३

च भोजनं ॥ कथासमाप्तौ भोक्तव्यमेवं कुर्यात्कृपावृती ॥४४॥ द्विदलं मधु तैलं च गरिष्ठान्नं तथै
व च ॥ मावं दुष्टं च पर्युषितं त्यजन्ति त्यं कृपावृती ॥४५॥ वृन्ताकं च कलिंगं च दग्धमन्नं
मसूरिकां ॥ निष्पावान्नाम्लिकां द्वं च वर्जयेच्च कृपावृती ॥४६॥ पलाण्डुं लशुनं हिंगुं मू
लकं गृंजनं तथा ॥ नालिकामूलकूष्माण्डं नैवाद्याच्च कृपावती ॥४७॥ सत्यं शौचं दया
ञ्जै मार्जवं विनयं तथा ॥ उदारमानसं तच्च कुर्याद्देवं कृपावृती ॥४८॥ दरिद्रश्चाथवा रोगी
निर्भाग्यः पापकर्मवान् ॥ अनपत्यो मनोदुःखी कामः राज्यार्थी कृपाश्रितां ॥४९॥ अपुत्रा
काकवंध्या च वंध्या या च [illegible] मृतार्भका ॥ अवगर्भा च या नारी तया कार्यं व्रतं प्रयत्नतः ॥५०॥
एतेन विधिना दत्तं तदक्षयतरं भवेत् ॥ अल्पं तन्मादिना सप्तकोटिगुणफलप्रदा ॥५१॥ एवं
कृत्वा व्रतविधिमुद्यापनमथाचरेत् ॥ तत्कृष्णाष्टमीव्रतवत् कर्तव्यं फलकांक्षिभिः ॥५२॥
अकिंचने शुभक्तिश्रद्धायोगो नो यापनाग्रहः ॥ अवसौ वपतास्ते निःकामा वैष्णवा यतः ॥५३
एवं न स्याह यज्ञे स्मिन्स्मार्तपूजात्र निसदा ॥ पुस्तकस्य च वक्तुश्च पूजा कार्या तिथिमक्तितः ॥५४
प्रसादस्त्रैलसी मालाश्चात्र अपि ष्याप्यदीयतां ॥ मृदंगताल ललितं कीर्तनं कीर्तयेत्ततः ॥५५
जयशब्दो नमःशब्दः शंखशब्दश्च गीयतां ॥ विप्रेभ्यो याजकेभ्यश्च वित्तमन्नं च दीयतां ॥५६॥ विरक्ता
श्च भवेश्चातिथीनान्धापरे हनि ॥ गृहस्थश्च तदा होमः कर्तव्यः कर्मशान्तये ॥५७॥ प्रतीष्टे
कं च जुहुयात् तद्विधिना दशमस्य च ॥ पायसं मधुसर्पिश्च तिलमन्त्रादिकं यतं ॥५८॥ अथवा

नै१०

ह्वनं कुर्याद्भायुक्तःसुसमाहितः॥ तन्मयत्वात्तुरात्तास्य परमस्यास्य तत्त्वतः॥५९॥ होमाप्ल
क्तौ वुधो होमं दद्यात्तत्मूल सिद्धये॥ विप्रस्य च विधानार्थं न्यूनाधिक्यमावयोः॥६०॥
दोषप्रशमनार्थं हि पठेन्नाम सहस्रकं॥ तेनस्यात्तत्फलं सर्वं नास्त्यस्मादधिकं च यत्॥६१॥ द्वादश
ब्राह्मणान्पश्चाद्भोजयेन्मधुपायसैः॥ दद्यात्सुवर्णंधेनुं च व्रतपूर्णत्वसिद्धये॥६२॥ शा
क्तो पलत्रयमितं हेम सिंहं विधाय च॥ तत्रास्य पु[illegible]स्तकं स्थाप्य लिखितं ललितादरैः॥६३॥ ६
संपूज्यावाहनाद्यैश्च उपचारैः सदक्षिणां॥ वस्त्रभूषणगंधाद्यैः पूजिताय महात्मने॥६४
आचार्याय सुधीर्दत्वा मुक्तः स्याद्भवबंधनैः॥ एवं कृते विधाने च सर्वपापनिवारणे॥ फल
दं स्यान्नराणां तु श्रीमद्भागवतं शुभं॥ धर्मार्थकाममोक्षाणां साधनं नात्र संशयः॥६६॥
इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि॥ श्रीमद्भागवतेनैव भुक्तिमुक्तिः प्रकाशिते॥६
सूत उवाच॥ इत्युक्त्वा ते महात्मानः प्रोचुर्भागवतीं कथां॥ सर्वपाप[illegible]हरां पुण्यां भुक्तिमुक्तिप्र
दायिनीं॥६७॥ शृण्वतां सर्वभूतानां सप्ताहं नियमात्मनां॥ यथाविधि ततो देवं तुष्टुवुः पुरु
षोत्तमं॥६८॥ तदंते ज्ञानवैराग्यभक्तीनां पुष्टता परा॥ तारुण्यं परमं चाभूत्सर्वलोकमनो
हरं॥७०॥ नारदश्चीकृतार्थोभूत्सिद्धेस्वीये मनोरथे॥ पुलकांकितसर्वांगः परमानंदसंभृतः
॥७१॥ एवं कथां समाकर्ण्य नारदो भगवत्प्रियः॥ प्रेमगद्गदया वाचा तान्वाच कृतांजलिः॥७
नारद उवाच॥ धन्योस्म्यनुगृहीतोस्मि भवद्भिः करुणापरैः॥ अद्य भागवता लब्धः सप्ताहे

निकटे हरिः॥ अवशाः सर्वधर्मेभ्यो वरं मन्ये तपोधनाः॥ वैकुंठस्थोपि तत्कृष्णः अवशाद्य
स्य लभ्यते॥७४॥ सूत उवाच॥ एवं वदति वै तस्मिन्नारदे वैष्णवोत्तमे॥ परिक्रमन्स्समा
यातः शुको योगेश्वरस्तदा॥७५॥ तत्रायषोडशवार्षिकः सदा व्यासात्मजो ज्ञानमहाब्धि
चंद्रमा॥ कथावसाने निजलाभपूर्णः प्रेम्णा पठन् भागवतं शनैः शनैः॥ दृष्ट्वा सदस्याः परमो
रुतेजसं सद्यः समुत्थाय ददुर्महासनं॥ प्रीत्या सुरर्षिस्तमपूजयत्सुखं स्थितो वदत्संशृणुतां
तामलां गिरं॥७७॥ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं॥ पिबत भा
गवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥७८॥ धर्मः प्रोज्झितकैतवोत्र परमो नि
र्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं॥ श्रीमद्भागवते महा
मुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिः तत्क्षणात्॥७९॥
श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन्पारमहंस्यधर्ममलं ज्ञानं
परं गीयते॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्प्रपठन्विचार
णापरो भक्त्या विमुच्येन्नरः॥८०॥ स्वर्गे सत्ये च कैलाशे वैकुंठे नास्त्ययं रसः॥ अतः पिबं
तु सद्भाग्या मा मा मुंच कर्हिचित्॥८१॥ श्रीसूत उवाच॥ इति ब्रुवाणे सति बादरायणौ मध्ये
सभायां श्रीहरिराविरासीत्॥ प्रह्लादबल्युद्धवफाल्गुनाद्यैः वृतः सुरर्षिः तमपूज्य
च तान्॥८२॥ दृष्ट्वा प्रसन्नं महदासने विभुं ते चक्रिरे कीर्तनमग्रतस्तदा॥ भवो भवान्या

कमलासनः सुतैस्तत्रागमनं कीर्तनदर्शनाय च ॥ प्रह्लादस्तालधारी तरलगतितया चो-
द्धवः कांस्यधारी वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्त्ताऽर्जुनोऽभूत् ॥ इंद्रोवादीन्मृ-
दंगं जयजयसुकराः कीर्त्तयंते कुमाराः ॥ यत्राग्रे भाववक्ता रसविरचनया व्यासपुत्रो ब-
भूव ॥८४॥ शौनक उवाच ॥ शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः सुरर्षये कदा
ब्रूहि मे छिंधि नः संशयमिदं ॥ सूत उवाच ॥ आकृष्णनिर्गमात्त्रिंशद्वर्षाधिके गते क-
लौ ॥ नवमीतो नभस्ये वै कथारंभं शुकोऽकरोत् ॥८५॥ परीक्षिच्छ्रवणांते च कलौ व-
र्षशतद्वये शुद्धे शुचौ नवम्यां वै धेनुजोऽकथयत्कथां ॥८६॥ अस्मादपि कलौ या-
ते त्रिंशतं सद्भुदक्के ॥ ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः ॥८७॥ इति ते सर्वमा-
ख्यातं यत्पृष्टोऽहं त्वयानघ ॥ कलौ भागवती वार्ता भवरोगविनाशनी ॥८८॥ कृष्णप्रि-
यं सकलकल्मषनाशनं च मुक्त्यैकहेतुमिह भक्तिविलासकं च ॥ संतः कथानकमि-
दं पिबतादरेण लोके हितार्थपरिशीलनसेवया किं ॥८९॥ स्वपुरुषमभिवीक्ष्य पाशह-
स्तं वदति यमः किल तस्य कर्णमूले ॥ परिहर भगवत्कथासु मत्तान्प्रभुरहमन्यनृ-
णां न वैष्णवानां ॥९०॥ असारे संसारे विषयविषसंगाकुलधियः ॥ क्षणार्द्धं क्षेमा-
र्थं पिबत शुककथातुलसुधां ॥ किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षि-
त्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने ॥९१॥ रसप्रवाहसंस्थेन श्रीशुकेनेरि-